श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## भगवध्यान सोपानम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

अन्तर् ज्योथिः किमपि यमिनाम् अञ्जनं योगधृष्टेः
चिन्ता रत्नं सुलभमिह नः सिद्धि मोक्षनुरूपम्।
दीनानाथ व्यसन शमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुति परिषदां दृश्यते रङ्ग मध्ये॥१

वेलातीत श्रुति परिमलं वेधसां मौलि सेव्यं
प्रादुर् भुतं कनक सरितः सैकते हंस जूष्टे।
लक्ष्मी भूम्योः कर सरसिजैर् लालितं रङ्ग भर्तुः
पादां भोजं प्रतिफलति मे भावना दीर्घिकायाम्॥२

चित्रा कारां कटक रुचिभिश्चारु वृत्तानु पूर्वां
काले दूत्य दृततर गतिं कान्ति लीला कलाचीम्।
जानु च्छाया द्विगुण सुभगां रङ्गभर्तुर् मदात्मा
जङ्घां धृष्ट्वा जनन पदवी जाङ्घिकत्वं जहाति॥३

कामाराम स्थिर कदलिका स्तम्भ संभावनीयं
क्षौमाश्लिष्टं किमपि कमला भूमि नीलोपधानम्।
न्यञ्चत् काञ्चि किरण रुचिरं निर्विशत्यूरु युग्मं
लावण्यौघ द्वयमिव मतिर् मामिका रङ्ग यूनः॥४

संप्रीणाति प्रति कलमसौ मानसं मे सुजाता



rmvenkat@yahoo.com

गम्भीरत्वात् क्वचन समये गूड निक्षिप्त विश्वा।
नालीकेन स्फुरित रजसा वेधसो निर्मिमाणा
रम्यावर्त ध्युति सहचरी रङ्गनाथस्य नाभिः॥५

श्रीवत्सेन प्रथित विभवं श्री पद न्यास धन्यं
मध्यं बाह्वो मणिवर रुचा रञ्जितं रङ्गधाम्नः।
सान्द्रच्छायं तरुण तुलसी चित्र्या वैजयन्त्या
सन्तापं मे शमयति धियश्चन्द्रिकोदार हारम्॥६

एकं लीलोपहितमितरं बाहुमाजानु लम्बं
प्रप्ता रङ्गे शयितुरखिल प्रार्थना पारिजातम्।
धृप्ता सेयं धृड नियमिता रश्मिभिर् भूषणानां
चिन्ताहस्तिन् यनुभवति मे चित्रमालान यन्त्रम्॥७

साभिप्राय स्मित विकसितं चारु बिम्बाधरोष्ठं
दुःखापाय प्रणियिनि जने दूर दत्ताभि मुख्यम्।
कान्तं वक्त्रं कनक तिलकालङ्कृतं रङ्ग भर्तुः
स्वान्ते गाडं मम विलगति स्वागतोदार नेत्रम्॥८

माल्यैरन्तः स्थिर परिमलै वल्लभा स्पर्श मान्यैः
कुप्यचोली वचन कुटिलैः कुन्तलैः श्लिष्ट मूले।
रत्नापीढ ध्युति शबलिते रङ्गभर्तुः किरीटे
राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे॥९

पादाम् भोजं स्पृशति भजते रङ्ग नाथस्य जङ्घाम्
ऊरुद्वन्द्वे विलगति शनैर् ऊर्ध्वम् अभ्येति नाभिम्।
वक्षस्यास्ते वलति भुजयोर् मामिकेयं मनीषा
वक्त्रा भिख्यां पिबति वहते वासनां मौलि बन्धे॥१०

कान्तोदारैर् अयमिह भुजैः कङ्कण ज्या किणाङ्कैः
लक्ष्मी धाम्नः पृथुल परिगैर् लक्षिताभीति हेतिः।
अग्रे किञ्चिद् भुजग शयनः स्वात्मनै वात्मनः सन्



rmvenkat@yahoo.com

मध्ये रङ्गं मम च हृदये वर्तते सावरोधः ॥११

रङ्गास्थाने रसिक महिते रञ्जिता शेषचित्ते
विद्वत् सेवा विमल मनसा वेङ्कटेशेन ृप्तम्
अशेन प्रणिहित धियाम् आरुरुक्षोर वस्थां
भक्तिं गाडां दिशतु भगवद् ध्यान सोपान मेतत् ॥१२

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat